# Shri Siddhalinga Ashtakam

# શ્રી સિદ્ધલિઙ્ગાષ્ટકમ્

## Document Information

Text title : Shri Siddalinga Ashtakam

File name : siddhalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : M. G. Nanjundaradhya

Proofread by : Vani V.

Latest update : October 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2022

*sanskritdocuments.org*

Shri Siddhalinga Ashtakam

# શ્રી સિદ્ધલિઙ્ગાષ્ટકમ્

-શ્રી એમ. જિ. નઞ્જુણ્ડારાધ્યવિરચિતં

આત્માનાત્મવિવેકપૂર્ણકુશલં વિદ્યાવધૂવલ્લભં
 પઞ્ચાચારવિચાર ષટ્સ્થલસુધાસ્વાદૈકવેદ્યં વિભુમ્ ।
વ્યોમાતીત સુકીર્તિયુક્તમમલં ભક્તેષ્ટસિદ્ધિ પ્રદં
 વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકરમ્ ॥ ૧॥

યં બ્રહ્મેન્દ્રમરુદ્ગણાઃ પ્રતિદિનં ધ્યાયન્તિ ભક્ત્યા મુદા
 વેદાદ્યૈઃપ્રતિપાદ્યમાનવિભવં તં દેવદેવં શિવમ્ ।
યોગાભ્યાસબલાન્નિયમ્ય હૃદયે યો લોકવન્દ્યો બભૌ
 વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રી શૈવરત્નાકરમ્ ॥ ૨॥

સત્પત્નીતનુજાપ્તમિત્ર વિભવા નિત્યાઃ કિલેતિ પ્રભો !
 ભ્રાન્તોઽહં નિજતત્વમાર્ગવિમુખો ઘૂર્ણામિ ભૂમૌ સદા ।
આશાપાશવિમોચનૈકચતુરં ત્વાં સર્વસંરક્ષકં
 વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકમ્ ॥ ૩॥

નિર્લિપ્તં કરુણાકરં સુખમયં શાન્તં મહોત્સાહિનં
 ભક્તાધીનસુમઙ્ગલાઙ્ગવિભવં ચિલ્લિઙ્ગલોલં ગુરુમ્ ।
વેદાન્તાગમશાસ્ત્રવિદમણિં સત્યવ્રતં સ્વામિનં
 વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકરમ્ ॥ ૪॥

લબ્ધ્વાપુણ્યલવં શિવસ્ય કૃપયા પ્રાપ્ય સ્વરૂપશ્રિયં
 મૂકાન્ધાદિવિકારજાલસરણિં યાવત્તુ ન પ્રાપ્નુયામ્ ।
તાવત્વાં સુરસેવિતં સુખકરં સંસારશૈલાશનિં
 વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકરમ્ ॥ ૫॥

વિદ્યુલ્લોલવિલોભકારિવિષયવ્યાસક્ત ચિત્તસ્સદા
 કામક્રોધનિબદ્ધમૂર્તિરનિશં તામ્યામિ ભૂમૌ વિભો ! ।
મોહામ્ભોનિધિતારકં યતિનુતં સુજ્ઞાનદાનાગ્રણીં

વન્દે શ્રીગુરુ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકરમ્ ॥ ૬॥

મોહધ્વાન્તવિભેદકં શિવરતિજ્યોત્સ્નાસુધાસેચકં
પુણ્યારણ્યચરૈક દિવ્યશિખિનં કૈવલ્યકલ્પદ્રુમમ્ ।
સંસારાર્ણવમગ્નલોકતરણિં ભવ્યાત્મસંશોભિતં
વન્દે તોણ્ટદ સિદ્ધલિઙ્ગયતિનં શ્રીશૈવરત્નાકરમ્ ॥ ૭॥

આનન્દામ્બુધિચન્દ્ર બન્ધુર કૃપામન્દાર સત્યાશ્રય
નાનાયોગિવરેણ્યવન્દિત લસત્પાદાબ્જ વિદ્યોતિત ।
ભાનુજ્યોતિરતીતકાન્તિમહિમઃ શ્રીસિદ્ધલિઙ્ગપ્રભો !
ત્વાં વન્દે ભવમોચનાયસુગુરો ! માં રક્ષ રક્ષાધુના ॥ ૮॥

સિદ્ધલિઙ્ગાષ્ટકં લોકે યઃ પઠેચ્છૃણુયાદપિ
વિમુચ્યકિલ્બિષૈસ્સર્વૈશિવપ્રીતિમવાપ્નુયાત્ ।
અમરોક્તાષ્ટકં ચેદં જીયાદાચન્દ્રતારકમ્
ભક્તેષ્ટાર્થપ્રદો દેવો સિદ્ધલિઙ્ગો વિરાજતમ્ ॥

ઇતિ અમરવાણ્યભિધ નઞ્જુણ્ડારાધ્યવિરચિતં સિદ્ધલિઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Vani V.

*Shri Siddhalinga Ashtakam*

pdf was typeset on October 31, 2022

Please send corrections to *sanskrit@cheerful.com*